३२

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।१ द्यावापृथिवी, २-३ इन्द्रस्त्वष्टा वा, ४-५ राका, ६-७ सिनीवाली, ८ लिङ्गोक्ताः । जगती, ६-८ अनुष्टुप्

**अ॒स्य मे॑ द्यावापृथिवी ऋता॒यतो॑ भू॒तम॑वि॒त्री वच॑सः॒ सिषा॑सतः।**
**ययो॒रायुः॑ प्रत॒रं ते इ॒दं पु॒र उप॑स्तुते वसू॒युर्वां॑ म॒हो द॑धे॥ २.०३२.०१**

द्यावापृथिवी- हे द्यावापृथिव्यौ। ऋतायतः- प्रकृतिनियतिभूतसत्यमिच्छन्त्यौ। सिषासतः- सम्भक्तुमिच्छन्त्यौ। अस्य- एतस्य। मे- मम। वचसः- स्तोतुः। अवित्री- अवित्र्यौ। भूतम्- भवतम्। ययोः। आयुः- अन्नम्। प्रतरम्- प्रकृष्टतरं जायते। ते- द्यावापृथिव्यौ। उपस्तुते- श्रुतिभिः स्तुते। वसूयुः- अन्नकामोऽहम्। वाम्- युवयोः। इदम्- एतत्। महः- माहात्म्यम्। पुरो दधे- पुरस्करोमि ॥१ ॥

**मा नो॑ गुह्या॒ रिप॑ आ॒योरह॒न्दभ॒न्मा न॑ आ॒भ्यो री॑रधो दु॒च्छुना॑भ्यः।**
**मा नो॒ वि यौः॑ स॒ख्या वि॒द्धि तस्य॑ नः सुम्ना॒य॒ता मन॑सा॒ तत्त्वे॑महे॥ २.०३२.०२**

आयोः- मनुष्यस्य। गुह्याः- अन्तर्हिताः। रिपः- हिंसाभावनाः। अहन्- प्रतिदिनम्। नः- अस्मान्। मा दभन्- मा हिंसिषुः। नः- अस्मान्। दुच्छुनाभ्यः- दुष्टेभ्यो दुःखकरेभ्यः। मा रीरधः- वशं मा नैषीः। रध्यतिर्वशागमने इति यास्कः। नः- अस्माकम्। सख्या- सख्यानि। मा वि यौः- त्वत्तो मा वियुक्तानि कुरु। तस्य- तन्नो भावनम्। विद्धि- जानीहि। सुम्नायता- सुखमिच्छता। मनसा- चित्तेन। त्वा- भवन्तम्। तत्। ईमहे- याचामहे ॥२ ॥

**अहे॑ळता॒ मन॑सा श्रु॒ष्टिमा व॑ह दु॒हानां॑ धे॒नुं पि॒प्युषी॑मस॒श्चत॑म्।**
**पद्या॑भिरा॒शुं वच॑सा च वा॒जिनं॒ त्वां हि॑नोमि पुरुहूत वि॒श्वहा॑॥ २.०३२.०३**

Dr. Ranganji
WEBOLIM

अहेळता- अक्रोधेन। मनसा- चित्तेन। श्रुष्टिम्- सुखकरीम्। दुहानाम्- ज्ञानदोग्ध्रीम्। पिप्युषीम्- पूरयित्रीम्। असश्चतम्- रागरहिताम्। धेनुं चिद्रश्मिप्रतीकभूताम्। आ वह। पुरुहूत- बहुभिर्हूत। विश्वहा- सर्वेष्वहःसु। पद्याभिः- गतिभिः। आशुम्- द्रुतम्। वचसा- मन्त्रेण। च। वाजिनम्- बलिनम्। त्वाम्- भवन्तम्। हिनोमि- प्रेरयामि ॥३॥

**राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना।**
**सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम्॥ २.०३२.०४**

अहम्। सुहवाम्- शोभनाह्वानाम्। राकाम्- पूर्णप्रकाशयुक्तचन्द्रयुक्तां निशां रसप्रदां मनुष्यप्रज्ञामित्याध्यात्मिके। सुष्टुती- शोभनस्तुत्या। हुवे- आह्वये। सुभगा- सौभाग्यवती। नः- अस्मान्। शृणोतु। त्मना- स्वतः। बोधतु। अच्छिद्यमानया- अविच्छिन्नया। सूच्या- सूक्ष्मबुद्ध्या। अपः- मूलशक्तिधाराः। सीव्यतु- सन्तनोतु। शतदायम्- प्रभूतसम्पद्युक्तम्। उक्थ्यम्- मन्त्रमयम्। वीरम्- वीर्यसम्पन्नं पुत्रम्। ददातु- यच्छतु ॥४॥

**यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि।**
**ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा॥ २.०३२.०५**

राके। याः। ते- तव। सुपेशसः- शोभनरूपिण्यः। सुमतयः- शोभनभावनाः। याभिः। दाशुषे- दात्रे। वसूनि- सम्पदः। ददासि- यच्छसि। ताभिः। नः- अस्मान्। सुभगे- सौभाग्यवति। अद्य- इदानीम्। सुमनाः- शोभनचित्ता। सहस्रपोषम्- अनन्तपुष्टिम्। रराणा- ददती। उपागहि- आगच्छ ॥५॥

**सिनीवालि पृथुष्टुके या देवानामसि स्वसा।**
**जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः॥ २.०३२.०६**

Dr.Rangaji
WEBOLIM

सिनीवालि- शुक्लमिश्रिते सोमसम्बन्धिनि रसाधिदैवते। सिनी शुक्ला। वल मिश्रणे।। पृथुष्टुके- पृथुसंहते। या। देवानाम्। स्वसा- भगिनी। असि- भवसि। आहुतम्- समर्पितम्। हव्यम्। जुषस्व- सेवस्व। देवि- द्योतनशीले। नः- अस्मभ्यम्। दिदिड्ढि- उपचिनु। दिह उपचये ॥६॥

**या सु॑बा॒हुः स्व॑ङ्गु॒रिः सु॒षूमा॑ बहु॒सूव॑री।**

**तस्यै॑ वि॒श्पत्न्यै॑ ह॒विः सि॑नीवा॒ल्यै जु॑होतन॥ २.०३२.०७**

या। सुबाहुः- शोभनबाहुः। स्वङ्गुरिः- शोभनाङ्गुळिः। सुषूमा- सुष्ठु प्रसवित्री। षूङ् प्राणिप्रसवे। बहुसूवरी- बह्वीनां सवित्री। तस्यै। विश्पत्न्यै- प्रजानां पालयित्र्यै। सिनीवाल्यै- शुक्लमिश्रितायै सोमसम्बन्धिन्यै रसाधिदेवतायै। हविः- हव्यम्। जुहोतन- समर्पयत ॥७॥

**या गु॒ङ्गूर्या सि॑नीवा॒ली या रा॒का या सर॑स्वती।**

**इ॒न्द्रा॒णीम॑ह्व ऊ॒तये॑ वरुणा॒नीं स्व॒स्तये॑॥ २.०३२.०८**

या। गुङ्गूः- कुहूः। नवेन्दुकलामावास्या। या। सिनीवाली- शुक्लमिश्रिता सोमसम्बन्धिनी रसाधिदेवता। सिनी शुक्ला। वल मिश्रणे। या। राका- शोभनदायिनी। रा दाने। या। सरस्वती- रसचोदयित्री। इन्द्राणीम्- ईशनाधिदेवताम्। ऊतये- रक्षायै। वरुणानीम्- ऋताधिदेवताम्। स्वस्तये- मङ्गळाय। अह्वे- आह्वये ॥८॥

Dr. Rangaji

WEBOLIM